# श्री षष्ठी देवि स्तोत्रं

## श्री षष्ठी देवि स्तोत्रं

ध्यानं |
श्रीमन्मातरमंबिकां विधिमनोजातां सदाभीष्टदां
स्कंदेष्टां च जगत्प्रसूं विजयदां सत्पुत्र सौभाग्यदां |
सद्रत्नाभरणान्वितां सकरुणां शुभ्रां शुभां सुप्रभां
षष्ठांशां प्रकृतेः परं भगवतीं श्रीदेवसेनां भजे || 1 ||

षष्ठांशां प्रकृतेः शुद्धां सुप्रतिष्ठां च सुव्रतां
सुपुत्रदां च शुभदां दयारूपां जगत्प्रसूं |
श्वेतचंपकवर्णाभां रक्तभूषणभूषितां
पवित्ररूपां परमं देवसेना परां भजे || 2 ||

स्तोत्रं |
नमो देव्यै महादेव्यै सिद्ध्यै शांत्यै नमो नमः |
शुभायै देवसेनायै षष्ठीदेव्यै नमो नमः || 1 ||

वरदायै पुत्रदायै धनदायै नमो नमः |
सुखदायै मोक्षदायै षष्ठीदेव्यै नमो नमः || 2 ||

सृष्ट्यै षष्ठांशरूपायै सिद्धायै च नमो नमः |
मायायै सिद्धयोगिन्यै षष्ठीदेव्यै नमो नमः || 3 ||

सारायै शारदायै च परादेव्यै नमो नमः |
बालाधिष्टातृदेव्यै च षष्ठीदेव्यै नमो नमः || 4 ||

कळ्याणदायै कळ्याण्यै फलदायै च कर्मणां |
प्रत्यक्षायै सर्वभक्तानां षष्ठीदेव्यै नमो नमः || 5 ||

पूज्यायै स्कंदकांतायै सर्वेषां सर्वकर्मसु |
देवरक्षणकारिण्यै षष्ठीदेव्यै नमो नमः || 6 ||

शुद्धसत्त्वस्वरूपायै वंदितायै नृणां सदा |
हिंसाक्रोधवर्जितायै षष्ठीदेव्यै नमो नमः || 7 ||

धनं देहि प्रियां देहि पुत्रं देहि सुरेश्वरि |
मानं देहि जयं देहि द्विषो जहि महेश्वरि || 8 ||

धर्मं देहि यशो देहि षष्ठीदेवी नमो नमः |
देहि भूमिं प्रजां देहि विद्यां देहि सुपूजिते |
कळ्याणं च जयं देहि षष्ठीदेव्यै नमो नमः || 9 ||

फलश्रुति |
इति देवीं च संस्तुत्य लभेत्पुत्रं प्रियव्रतं |
यशश्विनं च राजेंद्रं षष्ठीदेवि प्रसादतः || 10 ||

षष्ठीस्तोत्रमिदं ब्रह्मान् यः शृणोति तु वत्सरं |
अपुत्रो लभते पुत्रं वरं सुचिर जीवनं || 11 ||

वर्षमेकं च या भक्त्या संस्तुत्येदं शृणोति च |
सर्वपापाद्विनिर्मुक्ता महावंध्या प्रसूयते || 12 ||

वीरं पुत्रं च गुणिनं विद्यावंतं यशस्विनं |
सुचिरायुष्यवंतं च सूते देवि प्रसादतः || 13 ||

काकवंध्या च या नारी मृतवत्सा च या भवेत् |
वर्षं श्रुत्वा लभेत्पुत्रं षष्ठीदेवि प्रसादतः || 14 ||

रोगयुक्ते च बाले च पितामाता शृणोति चेत् |
मासेन मुच्यते रोगान् षष्ठीदेवि प्रसादतः || 15 ||

जय देवि जगन्मातः जगदानंदकारिणि |
प्रसीद मम कळ्याणि नमस्ते षष्ठीदेवते || 16 ||

इति श्री षष्ठीदेवि स्तोत्रं |